CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library
SDPB
Coll. No. 306

Title Kārtavīryārjuna vidhi

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 306 Subject: Pauranic lit.

Title: Kārtavīryārjuna vidhi

Author: Kāśibhadra Scribe: —

Date of the work: — Date of the Ms.: V.S. १६८९

Place of the work: — Place of the Ms.: —

Size: 6.1" by 3.7" Extent: 16 foll.

Language: Sanskrit Script: Devanagari

Remarks:

श्रीगणेशायनमः॥कार्तवीर्यार्जुनायनमः॥
स्नानविधिंव्याख्यास्यामः॥महानद्यांवा
पुष्करिण्यांवाजलाशयेगत्वाहस्तपादादि
प्रक्षाल्यकुशोपग्रहोबद्धशिखोआचम्यदे
शकालौस्मृत्वाममास्यकर्मणःनि
र्विघ्नेनसमाप्त्यर्थंईप्सितकामनासिध्यर्थं
स्नानंकरिष्ये॥स्वशाखोक्तमंत्रैःस्नात्वाकार्त
॥१॥

वीर्यस्नानंकु०॥ॐनमोभगवतेकार्तवीर्याय
क्रौंक्रौंसःस्वाहा॥अनेनाष्टवारमभिमंत्र्य॥
कवचेनावगुंठ्य॥अस्त्रेणसंरक्ष्य॥आत्मानं
कार्तवीर्यार्जुनरूपंध्यात्वाजलाहुतीर्जलेनि
क्षिपेत्॥ॐकार्तवीर्यार्जुनायस्वाहा॥१॥ॐ
हैहयेश्वरायस्वाहा॥२॥ॐदत्तात्रेयप्रियत
मायस्वाहा॥३॥ॐसहस्रभुजमंडितायस्वा

हा॥४॥ ॐ सुमुखाय स्वाहा॥५॥ ॐ दशात्रयप्रद
र्पहंत्रे स्वाहा॥६॥ ॐ चोरदमनाय स्वाहा॥७॥
ॐ राजराजराजेश्वराय स्वाहा॥८॥ ॐ सर्व
लो[illegible]नाय स्वाहा॥९॥ ॐ गुणाकराय स्वाहा
॥१०॥ इति दशांजलीर्निक्षिप्य ततो घमर्ष
णं कृत्वा स्नानपूर्वकमंत्रं जप्त्वा॥ द्वादशवारं
त्रिमज्ज्य मंत्रं जपित्वा च पश्चात्तर्पणं कुर्यात्॥ ॐ

क्रों कार्तवीर्यं तर्पयामि १॥ ॐ ध्रीं हैहयेश्वरं
तर्पं २॥ ॐ ह्लीं दत्तात्रेयप्रियं तर्पं ३॥ ॐ श्रीं स ॐ
हस्रभुजमंडितं तर्प ४ ॐ आं सहस्रबा
हुं तर्प ५ ॐ ह्रीं सुमुखं तर्प ६ ॐ क्रों महो
ग्रकीर्तिं तर्प ७ ॐ श्रीं रक्तकिरीटकुंडलं त
र्प ८ ॐ हुं नर्मदाप्रियं तर्पं ९ ॐ फट् त्रिभुव
नप्रियं तर्पं १०॥ ॥इति दशविधतर्पणं कृत्वा॥

॥३॥

सहस्त्रबाहुं इति नमस्कृत्य ॥ नमस्ते कार्त्तवी
र्याय दत्तात्रेयप्रियाय च ॥ आरब्धकर्मणः सि
द्धिं प्राप्नुयाम विलंबिता ॥ ततो जपं कुर्यात् ॥
तत्रादौ न्यासः ॥ ॐ अस्य श्रीकार्त्तवीर्यार्जुन
विंशार्णमंत्रस्य दत्तात्रेय ऋषिः ॥ अनुष्टुप्
छंदः ॥ श्रीकार्त्तवीर्यार्जुनो देवता ॥ क्रों बीजं ॥ न
मः शक्तिः ॥ ह्रीं कीलकं ॥ श्रीकार्त्तवीर्यार्जुनप्रसा

॥३॥

द सिद्ध्यर्थे जपे विनियोगः ॥ अथ षडंगं ॥ ॐ क्रों
ह्रीं अंगुष्ठाभ्यां नमः ॥ ॐ क्लीं भ्रूं तर्जनी ॥ ॐ आं
ह्रीं मध्यमा ॥ ॐ क्रों श्रीं अनामिकाभ्यां ॥ ॐ हुं
फट् कनिष्ठिकाभ्यां ॥ ॐ कार्त्तवीर्यार्जुनाय नमः
करतलकरपृष्ठाभ्यां ॥ [redacted] एवं हृ
दयादि ॥ ॥ ॐ क्रों ह्रीं हृदयाय नमः ॥ ॐ क्लीं भ्रूं
शिरसे स्वाहा ॥ ॐ आं ह्रीं शिखायै वषट् ॥

ॐ क्रौं श्रीं कवचाय हुं ॥ ॐ हुं फट् नेत्रत्रयाय
वौषट् ॥ ॐ कार्त्तवीर्यार्जुनाय नमः अस्त्राय
फट् ॥ अथाक्षरन्यासः ॥ ॐ क्रों ॐ मूर्ध्नि ॥
ॐ ह्रीं ॐ ललाटे ॥ ॐ क्लीं ॐ भ्रूयुगुले ॥
ॐ भ्रूं ॐ श्रोत्रयुगुले ॥ ॐ आं ॐ नेत्रयुगु
ले ॥ ॐ ह्रीं ॐ नासापुटद्वये ॥ ॐ क्रों ॐ मुखे ॥
ॐ श्रीं ॐ कंठे ॥ ॐ हुं ॐ दक्षिणभुजे ॥ ॐ

फट् ॐ वामभुजे ॥ ॐ कां ॐ हृदये ॥ ॐ र्तं ॐ उ
दरे ॥ ॐ वीं ॐ जठरे ॥ ॐ र्यां ॐ नाभौ ॥ ॐ र्जुं
ॐ गुह्ये ॥ ॐ नां ॐ गुदे ॥ ॐ यं ॐ ऊरुद्वये ॥
ॐ नं ॐ जानुद्वये ॥ ॐ मं ॐ पादद्वये ॥ सर्व
सिद्धिप्रदायको न्यासः ॥ अथासनपूजा ॥ ॐ
विमलायै नमः ॥ ॐ उत्कर्षिण्यै ॥ ज्ञानायै ॥
योगिन्यै ॥ प्रवाह्यै ॥ ईशान्यै ॥ अनुग्राहिण्यै ॥

वैष्णव्यै॥अनंतशक्तिकमलासनायै॥उ
सासनं विन्यस्य॥मूलेन देवमावाह्य पाद्या
दिपुष्पांतं विधाय॥अंगैः प्रथमावरणं॥
प्रागादिदिक्षु॥ॐ चोरमर्दविभंजनायन
मः॥ॐ मारीमर्दविभंजनाय॥शत्रुमर्दवि
भंजनायनमः॥राक्षसमर्दविभंजनायन
मः॥आग्नेयादिदिक्षु दुरितनाशनाय॥दुरि

तनाशनाय॥भयनाशनाय॥रोगनाशना
य॥इतिद्वितीयावरणं॥पूर्वाद्यष्टदिक्षु॥क्षे
मंकर्यै नमः॥वश्यंकर्यै॥श्रीकर्यै॥यशःक
र्यै॥आयुःकार्यै॥प्रज्ञाकर्यै॥विद्याकर्यै॥
धनंकर्यै॥-॥इतितृतीयावरणं॥ॐ इंद्रा
यनमः पूर्वे॥अग्नयेनमः॥यमायनमः॥नै
र्ऋतयेनमः॥वरुणाय॥वायवे॥सोमाय॥

ईशानाय॥ ईइईशानयोर्मध्ये ब्रह्मणे॥ नैर्ऋ
तिवरुणयोर्मध्ये अनंताय॥१॥ इति चतुर्था
वरणं॥ मंत्रः गुरुमुखाल्लेयः॥ पुरश्चरणं
लक्षजपः॥ पायसेन तिलतैलेन वासघ
तेन जपदशांशेन होमः॥ अथ यंत्रोद्धारः॥
लिखेदष्टदलं पद्मं केसराकर्णिकोज्वलं॥
वृत्तावृतं भूगृहाढ्यं वज्राष्टकविभूषितं॥

लंपद्मं केसराकर्णिकोज्वलं॥ वृत्तावृतं भूगृ
हाढ्यं वज्राष्टकविभूषितं॥ कर्णिकायां
साध्यनामकर्मयुक्तं सबीजकं॥ मूलबी
६ जंतारूढं तत्र लिखेत्पुवा॥ ~ वं॥ पूर्वादि
पत्रपत्रेषु लिखेद्बीजानि मंत्रवित्॥ सर्व
मंत्रावशिष्टानि मूलांतानंतरालके॥ वृ
त्तेषु स्वरान्लिख्य वर्णकान्समर्पयेत्॥

वत्तं प्रावेष्टयेद्वर्णैः कादिभिश्चाक्षवर्जितैः ॥ अ
स्रिकोणे चतुष्केषु अनवर्णान्समर्पयेत् ॥ तत्र
कार्यवशाद्देवितास्तान्वर्णान्विचिंतयेत् ॥ इति
यंत्रोद्धारः ॥ अष्टदलं सकर्णिकं मध्ये साध्ययु
६ क्तं बीजं विलिख्य दलेषु प्रणवादीन्यष्टौ बी ६
जानि वर्मास्त्रयुक्तानि विलिख्याऽवशि
ष्टान्वर्णान्मध्ये विलिख्य युक्ताक्षरयुता

न्षोडशस्वरान्केसरेषु लिखेत् ॥ पुनर्वर्ज
तान्ककारादिवर्णान्बहिर्वेष्टयेत् ॥ भूपुरे
कर्णचतुष्टये अनवर्णान् लिखेत् ॥ एवं यं
त्रं विलिख्य तदुपरि कलशं स्थापयित्वा तै अर्च्यैर्वा
नाभिषेकं कुर्यात् ॥ इष्टसिद्धिर्भवति ॥ ॥
वंध्या पुत्रवती भवति ॥ प्रथमं गुरुं तोषयेद्धे
मरत्नवस्त्रान्नादिना पूजां कुर्यात् ॥ ॥
अथ तत्प्रयोगानुसारेण बहुद्रव्यैर्वित्तपारात्रौ
कर्माणि कुर्यात्

ततोहोमविशेषेणप्रयोगाः ॥ श्वेतसर्षपैः
शत्रुमरणकामः कार्पासल शत्रुनिंबका
र्षककनकपत्रैः पुष्पैः फलैर्वा होमः ॥१॥ ब
८ कुलैश्चोरमारणं ॥२॥ खदिरैश्च शमीभि ८
रुच्चाटणं ॥३॥ नीलोत्पलदलैर्वशीकरणं ॥४॥
आज्याक्तैः पद्मैः सौभाग्यं ॥५॥ तिलगोघृ
तैः पापक्षयं ॥६॥ त्रिमधुमिश्रितंदुल

लवणलाजासिद्धार्थैर्महाभाग्यसिद्धिः ॥७॥
वटोदुंबरबिल्वशमीभिः महारोगग्रहशां
तिः ॥८॥ क्षीरेणपशुवृद्धिः ॥९॥ गुग्गुलेनभूत
तशांतिः ॥१०॥ प्रियंगुभिः स्त्रीवश्यं ॥११॥
ब्रह्मवृक्षसमिद्भिर्ब्रह्मवर्चसं ॥१२॥ आम्र
वृक्षसमिद्भिः प्रसादः ॥१३॥ कुशैः संततवृद्धिः ॥
॥१४॥ शालिहोमाद्भूमिवृद्धिः ॥१५॥ गोरो

चनगोमयाभ्यां स्नेहस्तंभः ॥१८॥ कार्पास
गृहधूमशत्रुपादपांसुमिश्रश्रीवक्षस
मिद्भिर्निशि होमात् चौरविद्वेषणं ॥१९॥
सर्पनिर्मोककनकबीजसिद्धार्थलवणैः
होमश्चोरभयनाशनं ॥२०॥ सहस्राद्ययु
तांतं होमः ॥ शुद्धजलेन दशांशतर्पणं ॥
सर्षपतैलमाहिषाज्यहोमो मारणादिस

र्वकार्येषु ॥ पुरश्चरणेन विना कार्यं न सिध्य
ति ॥ उरुभक्ष्येण दक्षेण ब्रह्मचर्यपरेण हि ॥
न्यायार्जितधनेनापि प्राक् पुरश्चरणं मतं
॥२१॥ गोब्राह्मणनिमित्तं मरणादि न कार्यं ॥
मारणे अष्टगोभूतिलदानैः सावित्रीस
हस्रं जपेत् ॥ प्राणायामैश्च चोरहनना
दि प्रायश्चित्तं ॥ षट्कर्म सर्वपापानां सावि

त्री सहस्रं जपः ॥ प्रायश्चित्तं ॥ कार्त्तवीर्यार्जु
नपूजाविधिः ॥ आदौ न्यासः कर्तव्यः ॥ पश्चा
ध्यानानि ॥ पश्चात् मंत्रजपः ॥ पश्चाद्विस
र्जनं ॥ सौम्यजपार्थे ध्यानं ॥ अथ ध्या सर्वभ
१० याद्य भास्कर निभः प्रद्योतन द्योतितः स्वर्णः
स्रक्परिवीतकंधरधर परोरस्कोंशुकोदंडी
षवान् ॥ नानाकल्पविभूषितः करसहस्रा

र्जितबाणासनो बाणानां नार्हसहस्रबाहुरनि
शं भवत्वभीनः प्रभुः ॥१॥ सप्तद्वीपैकना
थः सविहसमरुचिः सर्वदुर्ध्वांतकोयः पा
यादज्ञायताक्षो रथवरनिलयः स्थूल
भीमस्वरूपी ॥ चापेषु श्रीत्रिलोकेभयमि
व धनुषाग्निस्वना आसयंस्तान् श्रीमा
न् श्रीकार्तवीर्योऽरिदलनपविनतो वहृपे

द्विप्रकारी॥२॥ दुष्टोपशांत्यर्थे ध्यानं॥ ॥
दोर्दंडेषु सहस्रशोऽमितनरे [illegible]ष्वेकेपवज
संब्रजकोदंडेषु सारैरूदग्रविशिखैरूद्य
११ द्विवस्वत्प्रभः॥ अलोंकं परिपूरतस्सदाखि ११
लं गंडस्थलालोडितघोतकुंडलमंडितो
विजयते श्रीकार्तवीर्यप्रभुः॥१॥ चोरा
र्थे ध्यानं॥ सहस्रबाहुं सशरं सचापं र

क्तांबरं रक्तकिरीटकुंडलं॥ चोरादिदुष्टभय
नाशमिष्टदं तं ध्याये न्महाबलविजृंभि
तकार्तवीर्यं॥१॥ स्तंभनमारणमोहनध्या
नं॥ सहस्रबाहुं॥ वश्यार्थे ध्यानं॥ अरुणं
कुसुमसहस्रं तरुणं चरणद्युतिमुन्नतवस्त्र
धरं॥ करुणार्द्रमतिरमणीयतनुं शरणा
गतवज्रपंजरं नौमि विभुं॥१॥ नतोमनुं ज

पेत्॥ साधारण ध्यानं॥ दक्षे पंच शतं बाणा
न्वामे पंच शतं धनुः॥ कार्तवीर्यार्जुनो ना
म राजा रक्षतु मां सदा॥१॥ ॐ नमो भगव
१२ ते कार्तवीर्यार्जुनाय अमितविक्रमाय स १२
र्वदुष्टचोरदमनाय चक्षुष्पदध्वनगतांश्चो
र समूह नां कर्षय कर्षय ॐ हां ह्रीं हूं कार्त
वीर्यार्जुनाय हुं फट् स्वाहा। ततो गायत्री

जपेत्॥ कार्तवीर्याय विद्महे सहस्रबाहाय
धीमहि॥ तन्नो विष्णुः प्रचोदयात्॥१॥ स
र्वमंत्रप्रयोगेषु जप्तव्ये बाहितार्थिना॥गा
यत्री जपमात्रेण मंत्रवीर्यं प्रवर्द्धते॥ अ
स्त्रोपसंहरणमंत्रः॥ सोहमर्कमहं ज्योति
रर्कज्योतिरहं शिव॥ आत्मज्योतिरहं
सर्वं सर्वज्योतिर सोहसां॥१॥ विसर्जन

मंत्रः॥ कार्तवीर्य महावीर्य इत्यादि॥ अथ कार्त
वीर्यार्जुनस्य दीपदानविधिः॥ स्वच्छे पुण्यदे
शे गोमयेनोपलिप्य शुभ्रकंबलस्योपरि व
स्त्रं तस्योपरि कुशासनास्तीर्य तस्योपरि
१३ पद्मासनं कृत्वा प्राणानायम्याचम्य उद्दिष्ट १३
कार्यस्य सिद्ध्यर्थं कार्तवीर्यदीपं करिष्ये॥
तत्र यवगोधूमतंदुलानामन्यतमपिष्टेन क्र

न र्षत्र्यमितं दीपं विधाय नीलबीजलक्षणा कार्पास
स्य सूत्रं कुमारीनिर्मितं आनीय वर्तिं सानितंतु
भिः अष्टांगुलां वर्तिं विधाय गोघृतेन प्रज्व
ल्य ॐ ह्रां ह्रीं ह्रूं क्रीं कार्तवीर्य एहि २ मम समी
हितं कुरु २ स्वाहा॥ घृतेन शुद्धगव्येन प्रज्वा
भिज गमते॥ कार्तवीर्य महावीर्य कार्यं सि
ध्यं तु मे हितत्॥ अनेन दीपं प्ररयित्वा॥

ॐ क्रौं कार्तवीर्यवार्त्तिकल्प य२ स्वाहा ॥ अ
नेन वार्त्तिं विध्याय ॥ उज्वलन ॥ अथ संधु
क्षणमंत्रः ॥ ॐ ह्रीं रं रं कार्तवीर्य संधु क्ष्य२
ईप्सितं सिध्यतु स्वाहा ॥ दिवातु प्राङ्मुखो १४
१४ दीप स्थाप्य प्रत्यङ्मुखस्तथा ॥ मध्यरात्रे
तु वा यथ्यां दिवांते पिह दिक्छितं ॥ आग्ने
यां बीजं कुर्याततः संधुक्षयेत् सुधीः ॥

ॐ ह्रां ह्रीं हः श्रीकार्तवीर्य मम सन्निहितं
उद्दीपय २ हुं फट् स्वाहा ॥ ततो दीपं प्रज
पेत् साधु बीजं लिंग हीना ॥ सहस्र वाहु
न मारमिति जपेत् ॥ ततो रुद्राक्षमालया
होत्तर शतं मूलमंत्रं जपित्वानंतरं क
वचं पठेत् ॥ अथ मंत्रोद्धारः ॥ ॐ क्रौं श्रीं
क्लीं भ्रूं आं ह्रीं क्रौं श्रीं हुं फट् श्रीकार्तवीर्या

ॐ नायनमः ॥ अथदीपविसर्जनमंत्रः ॥
कार्तवीर्यनमस्तेऽस्तु कार्यं साधय सत्वरं ॥
उत्सर्जयामि ते दीपं प्रापयाशु स लोकतां
१५ ॥१॥ पंचवारं जपेन्मंत्रं सौ निशि पश्चिमोद १५
ङ्मुखः ॥ विवादे कलहे स्वस्वस्य जयो भव
ति नान्यथा ॥२॥ सप्तवारेण जप्तेन स्तो
त्रेण गतवस्तुना ॥ प्राप्तिर्भवति निश्चि

तं शिवस्य वचनं यथा ॥३॥ जपेद्द्वादशधा
स्तोत्रं बंधमुक्तिर्दिनत्रयात् ॥ महानिग
डबंधस्य नवरात्रेण मोचनं ॥४॥ सप्तविंश
तिभिर्जप्तैः परचक्रमुपस्थितं ॥ क्षणाद्वि
लयमायाति पापं विष्णोः स्मृतेरिव ॥५॥ अ
नेनैव प्रकारेण साधयेत्कार्यमुत्तमं ॥ प्र
त्ययो जायते सद्यो नान्यथा क्रतुकोटिभिः ॥६॥

इतिदीपदानविधिः॥ आदौ [illegible]सः॥ पश्चा
त्प्रमाणानि॥ पश्चात् मंत्र[illegible]॥ पश्चाद्वि
सर्जनं॥ ॥ इति कार्तिक[illegible]विधिः
१८ समाप्तः॥ शाके १६८८ कार्तिक [illegible] दिने ३ १८
दलग्राम स्थित काशिभट्टेन लिखितं॥